শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে চতুশ্চৎৱারিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে চতুশ্চৎৱারিংশং দশকম্॥

## জাতকর্মনামকরণৱর্ণনম্

গূঢং ৱসুদেৱগিরা
    কর্তুং তে নিষ্ক্রিযস্য সংস্কারান্।
হৃদ্গতহোরাতত্ত্বো
    গর্গমুনিস্ত্বদ্গৃহং ৱিভো গতৱান্॥ **44.1** ॥

নন্দোঽথ নন্দিতাত্মা
    ৱৃন্দিষ্টং মানযন্নমুং যমিনাম্।
মন্দস্মিতার্দ্রমূচে
    ৎৱৎসংস্কারান্ ৱিধাতুমুৎসুকধীঃ॥ **44.2** ॥

যদুৱংশাচার্যৎৱাৎ
    সুনিভৃতমিদমার্য কার্যমিতি কথযন্।
গর্গো নির্গতপুলক -
    শ্চক্রে তৱ সাগ্রজস্য নামানি॥ **44.3** ॥

কথমস্য নাম কুর্ৱে
    সহস্রনাম্নো হ্যনন্তনাম্নো ৱা।
ইতি নূনং গর্গমুনি -
    শ্চক্রে তৱ নাম নাম রহসি ৱিভো॥ **44.4** ॥

কৃষিধাতুণকারাভ্যাং
    সত্তানন্দাত্মতাং কিলাভিলপৎ।

জগদঘকর্ষিৎৱং ৱা
  কথযদৃষিঃ কৃষ্ণনাম তে ৱ্যতনোৎ॥ **44.5**॥

অন্যাংশ্চ নামভেদান্
  ৱ্যাকুর্ৱন্নগ্রজে চ রামাদীন্।
অতিমানুষানুভাৱং
  ন্যগদত্ত্বামপ্রকাশযন্ পিত্রে॥ **44.6**॥

স্নিহ্যতি যস্তৱ পুত্রে
  মুহ্যতি স ন মাযিকৈঃ পুনঃ শোকৈঃ।
দ্রুহ্যতি যস্স তু নশ্যে -
  দিত্যৱদৎ তে মহত্ত্বমৃষিৱর্যঃ॥ **44.7**॥

জেষ্যতি বহুতরদৈত্যান্
  নেষ্যতি নিজবন্ধুলোকমমলপদম্।
শ্রোষ্যতি সুৱিমলকীর্তী -
  রস্যেতি ভৱদ্বিভূতিমৃষিরূচে॥ **44.8**॥

অমুনৈৱ সর্ৱদুর্গং
  তরিতাস্থ কৃতাস্থমত্র তিষ্ঠধ্ৱম্।
হরিরেৱেত্যনভিলপ -
  ন্নিত্যাদি ৎৱামৱর্ণযৎ স মুনিঃ॥ **44.9**॥

গর্গেঽথ নির্গতেঽস্মিন্
  নন্দিতনন্দাদিনন্দ্যমানস্ত্বম্।
মদ্গদমুদ্গতকরুণো
  নির্গময শ্রীমরুৎপুরাধীশ॥ **44.10**॥

॥ ইতি শ্রীমন্নারাযণীযে চতুশ্চৎৱারিংশং দশকং সমাপ্তম্॥